# ॥ শ্রীরাধাষ্টকম্ ॥

ওঁ দিশিদিশিরচয়ন্তীং সঞ্চয়ন্নেত্রলক্ষ্মীং বিলসিতখুরলীভিঃ খঞ্জরীটস্য খেলাম্ ।

হৃদয়মধুপমল্লীং বল্লবাধীশসূনো- রখিলগুণগভীরাং রাধিকামর্চয়ামি ॥ ১॥

পিতুরিহ বৃষভানো রত্নবায়প্রশস্তিং জগতি কিল সয়ন্তে সুষ্ঠু বিস্তারয়ন্তীম্ ।

ব্রজনৃপতিকুমারং খেলয়ন্তীং সখীভিঃ সুরভিনি নিজকুণ্ডে রাধিকামর্চয়ামি ॥ ২॥

শরদুপচিতরাকাকৌমুদীনাথকীর্তি- প্রকরদমনদীক্ষাদক্ষিণস্মেরবক্ত্রাম্ ।

নটয়দভিদপাঙ্গোত্তুঙ্গিতানংগরঙ্গাং বলিতরুচিররঙ্গাং রাধিকামর্চয়ামি ॥ ৩॥

বিবিধকুসুমবৃন্দোত্ফুল্লধম্মিল্লধাটী- বিঘটিতমদঘূর্ণাত্কেকিপিচ্ছপ্রশস্তিম্ ।

মধুরিপুমুখবিম্বোদ্গীর্ণতাম্বূলরাগ- স্ফুরদমলকপোলাং রাধিকামর্চয়ামি ॥ ৪॥

নলিনবদমলান্তঃস্নেহসিক্তাং তরঙ্গা- মখিলবিধিবিশাখাসখ্যবিখ্যাতশীলাম্ ।

স্ফুরদঘভিদনর্ঘপ্রেমমাণিক্যপেটীং ধৃতমধুরবিনোদাং রাধিকামর্চয়ামি ॥ ৫॥

অতুলমহসিবৃন্দারণ্যরাজ্যেভিষিক্তাং নিখিলসময়ভর্তুঃ কার্তিকস্যাধিদেবীম্ ।

অপরিমিতমুকুন্দপ্রেয়সীবৃন্দমুখ্যাং জগদঘহরকীর্তিং রাধিকামর্চয়ামি ॥ ৬॥

হরিপদনখকোটীপৃষ্ঠপর্যন্তসীমা- তটমপি কলয়ন্তীং প্রাণকোটেরভীষ্টম্ ।

প্রমুদিতমদিরাক্ষীবৃন্দবৈদগ্ধ্যদীক্ষা- গুরুমপি গুরুকীর্তিং রাধিকামর্চয়ামি ॥ ৭॥

অমলকনকপট্টীদৃষ্টকাশ্মীরগৌরীং মধুরিমলহরীভিঃ সম্পরীতাং কিশোরীম্ ।

হরিভুজপরিরব্ধ্বাং লব্ধরোমাঞ্চপালীং স্ফুরদরুণদুকূলাং রাধিকামর্চয়ামি ॥ ৮॥

তদমলমধুরিম্ণাং কামমাধাররূপং পরিপঠতি বরিষ্ঠং সুষ্ঠু রাধাষ্টকং যঃ ।

অহিমকিরণপুত্রীকূলকল্যাণচন্দ্রঃ স্ফুটমখিলমভীষ্টং তস্য তুষ্টস্তনোতি ॥ ৯॥

ইতি শ্রীরাধাষ্টকম সম্পূর্ণম্ ॥